# Shri Ganesha Stotram Dhaumyakritam

# ધૌમ્યકૃતં શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Stotram Dhaumyakritam

File name : gaNeshastotramdhaumyakRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 35 | 8.35 6-19||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# ધૌમ્યકૃતં શ્રીગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
ધૌમ્ય ઉવાચ ।
નમામ્યહં ગણેશાનં સર્વસિદ્ધિપ્રદાયિનમ્ ।
ભક્તાનાં ભવયુક્તાનામન્યેષાં વિપરીતગમ્ ॥ ૬॥
ધન્યોઽહં સર્વભાવેષ્વધુના દૃષ્ટ્વા ગજાનનમ્ ।
કિં સ્તૌમિ ત્વાં મહાભાગ યોગેશં યોગરૂપિણમ્ ॥ ૭॥
તવ દર્શનમાત્રેણ જ્ઞાનયુક્તો વદામ્યહમ્ ।
સ્તોત્રં તે પ્રીતિદં પૂર્ણં શ‍ૃણુ સર્વજ્ઞસત્તમ ॥ ૮॥
ગણેશાય નમસ્તુભ્યં યોગશાન્તિપ્રદાયિને ।
શાન્તીનાં શાન્તિરૂપાય હેરમ્બાય નમો નમઃ ॥ ૯॥
અનામયાય જ્યેષ્ઠાય જ્યેષ્ઠપદપ્રદાયિને ।
જ્યેષ્ઠાનાં જ્યેષ્ઠરૂપાય વિઘ્નેશાય નમો નમઃ ॥ ૧૦॥
નામરૂપાત્મકેષ્વેવ શક્તિરૂપાય તે નમઃ ।
આત્મસુ રવયે તુભ્યં સમેષુ વિષ્ણવે નમઃ ॥ ૧૧॥
અવ્યક્તેષુ મહેશાય સંયોગેષુ નિજાત્મને ।
નિવૃત્તિષુ હ્યયોગાય કલાંશેન નમો નમઃ ॥ ૧૨॥
યોગેષુ શાન્તિરૂપાય બ્રહ્મણસ્પતયે નમઃ ।
આદિમધ્યાન્તભેદૈસ્તુ ખેલકાય નમો નમઃ ॥ ૧૩॥
નાનામાયાપ્રચાલાય સિદ્ધિબુદ્ધિપતે નમઃ ।
સ્વાનન્દવાસિને તુભ્યં ભક્તરક્ષણતત્પર ॥ ૧૪॥
કિં સ્તૌમિ ત્વાં ગણાધીશ વેદા યોગિન એવ ચ ।
ન સમર્થા અતો નાથ પ્રણમામિ ગજાનનમ્ ॥ ૧૫॥
એવમુક્ત્વા ગણાધીશં પપાતાઽસૌ ધરાતલે ।
દણ્ડવદ્ગણનાથસ્ય પાદૌ ગૃહ્ય મહામુનિઃ ॥ ૧૬॥
તમુત્થાપ્ય સ્વયં પ્રાહ ગણેશો બ્રહ્મણાં પતિઃ ।

વરાન્ વરય ધૌમ્ય ત્વં દાસ્યામિ સ્તોત્રતોષિતઃ ॥ ૧૭॥
સ્તોત્રં ત્વયા કૃતં મે યત્ પઠતે શૃણ્વતે સદા ।
સર્વસિદ્ધિપ્રદં ચાસ્તુ નાનાભાવાર્થદાયકમ્ ॥ ૧૮॥
યોગશાન્તિપ્રદં પૂર્ણં મયિ ભક્તિવિવર્ધનમ્ ।
યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રતોષિતઃ ॥ ૧૯॥

ઇતિ ધૌમ્યકૃતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૩૫ । ૮.૩૫ ૬-૧૯॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 35 . 8.35 6-19..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stotram Dhaumyakritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*